माल्येन भव भूषितः। विप्र! त्वं न च तत्काष्ठमालां गलगतां कुरु” इति वाक्यमालोच्य तथा व्यवस्थापयन्ति। अन्ये तु विष्णुदीक्षाविहीनविप्रस्य तत्काष्ठमालाधारणनिषेधः। विधिस्तु वैष्णवस्येति वर्णयन्ति। गणेशपूजने तुलसीनिषेधो यथा तुलसीं प्रति गणेशवाक्यम् “पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे!। कलांशेन महाभागे! स्वयं नारायणप्रिया। प्रिया त्वं सर्वदेवानां कृष्णस्य च विशेषतः। पूजा विमुक्तिदा नृणां मम त्याज्या च सर्वदा” ब्रह्मवैवर्त्ते गणेशखण्डम्। “अक्षतैर्नार्चयेद्विष्णुं न तुलस्या विनायकम्। न दूर्वया यजेद्दुर्गां धुस्तुरेण न भास्करम्” राघवभट्टधृतम्।

तुलसीग्रहणविधिः वायुपुराणे। “अस्नात्वा तुलसीं छित्त्वा यः पूजां कुरुते नरः। सोऽपराधी भवेत् सत्यं तत् सर्वं निष्फलं भवेत्”। तच्चयने मन्त्रान्तरं स्कान्दे “तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया। केशवार्थे चिनोमि त्वां वरदा भव शोभने”। “त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम्। तथा कुरु पवित्राङ्गि! कलौ मलविनाशिनि”। गारुडे च। मोक्षैकहेतो! धरणीप्रशस्ते। विष्णोः समस्तस्य गुरोः प्रियेति। आराधनार्थं वरमञ्जरीकं लुनामि पत्रं तुलसि! क्षमस्व। इत्युक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना। पत्राण्येकैकशोन्यस्येत् सत्पात्रे मञ्जरीरपि। तन्माहात्म्यञ्च स्कान्दे। “मन्त्रेणानेन यः कुर्य्यात् गृहीत्वा तुलसीदलम्। पूजनं वासुदेवस्य लक्षकोटिफलं लभेत्”। किञ्च “शालग्रामशिलार्च्चार्थं प्रत्यहं तुलसीक्षितौ। तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः”। इति। संक्रान्त्यादौ निषिद्धेऽपि तुलस्यवचयः स्मृतौ। परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते” हरिभ० तुलस्यवचयनिषेधकालः। विष्णुधर्म्मोत्तरे “नोच्छिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः क्वचित्”। गारुडे “भानुवारं विना दूर्वां तुलसीं द्वादशीं विना। जीवितस्याविनाशाय न विचिन्वीत धर्म्मवित्”। पाद्मे च श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये “द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके। लुनाति स नरो गच्छेन्निरयानतिगर्हितान्”। अतएवोक्तम्। “देवार्थे तुलसीच्छेदो होमार्थे समिधान्तथा। इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च”। “एवं कृत्वा महापूजामङ्गोपाङ्गादिकं प्रभोः। क्रमाद् यथा सम्प्रदायं तत्तत् स्थानेषु पूजयेत्”। हरिभक्तिविलासे ७विलासे। तुलसीविवाहप्रतिष्ठाविधिः “श्रीवशिष्ठ उवाच। विवाहं सम्प्रवक्ष्यामि तुलस्यास्तु यथाविधि। यथोक्तं पञ्चरात्रे वै ब्रह्मणा भाषितं पुरा”। “आदावेव वने वाप्य तुलसीं स्वगृहेऽपि वा। वर्षत्रयेण पूर्णेन ततो यजनमारभेत्। सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा। अथ वा कार्त्तिके मासि भीष्मपञ्चदिनेषु च। वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः। मण्डपं कारयेत्तत्र कुण्डवेदी तथा पुनः। शान्तिकञ्च प्रकर्त्तव्यं मातृणां स्थापनं तथा। मातृश्राद्धादिकं सर्वं विवाहवत् समाचरेत्। ब्राह्मणांश्च शुचिः स्नातान् वेदवेदाङ्गपारगान्। ब्रह्मा चादेशकश्चैव चत्वारश्च तथर्त्विजः। वैष्णवेन विधानेन वर्द्धनीकलसं यजेत्। मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम्। ग्रहयज्ञं पुरः कृत्वा मातृणां यजनं तथा। कृत्वा नान्दीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिम्। कृत्वारोप्य च तुलसीं लग्ने त्वस्तमिते रवौ। वासःशतेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत्। यदा बध्नेति मन्त्रेण कङ्कणं पाणिपल्लवे। कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते। ततः कुण्डे समागत्य आचार्य्यः सहसा द्विजैः। आचार्य्यो वेदिकाकुण्डे जुहुयाच्च नवाहुतीः। विवाहकर्मवत् सर्वं वैष्णवं देशिकोत्तमैः। कर्त्तव्यश्च ततो होमोविशेषाद्विधिपूर्वकम्”। “यजमानः सपत्नीको ह्यन्ये ये गोत्रबान्धवाः। प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह। तुलस्याः पाणिग्रहणे वेदिकायां विभावसौ। शातकुम्भं जपेत् सूक्तं पावमानीं विशेषतः। तथैव शान्तिकाध्यायम्। नवसूक्तीं तथैव च। जीवसूक्तं पुनर्जप्त्वा तथा वैष्णवसंहिताम्। शङ्खझल्लरिनिर्घोषैर्भेरीतूर्य्यस्य निस्वनैः। गायन्ति मङ्गलानार्य्यो माङ्गल्यं विधिमाचरेत्। दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः। ब्रह्मणे वृषभं दद्यादाचार्य्यं परिधाप्य च। गां पटञ्च तथा शय्यामाचार्य्याय प्रदापयेत्। ऋत्विग्भ्यो दापयेद्वस्त्राण्येषां दद्याच्च दक्षिणाम्। एवं प्रतिष्ठिता देवी विष्णुना च समर्च्चिता आजन्मोपार्जितं पापं दर्शनेन प्रणश्यति। रोपयेत्तुलसीं यस्तु सेचयेच्च प्रयत्नतः। प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः। स मोक्षं लभते जन्तुर्विष्णुलोकं तथा धनम्। प्राप्नोति विपुलान् भोगान् विष्णुना सह